अन्तर्हितं, त्रि, (अन्तर् + धा + क्तः ।) लुक्कायितं । गुप्तं । तत्पर्य्यायः । संवीतं २ रुद्धं ३ आवृतं ४ संवृतं ५ पिहितं ६ छन्नं ७ स्थगितं ८ अपवारितं ९ तिरोधानं १० । इति हेमचन्द्रः ॥ ("अन्तर्हिते शशिनि सैव कुमुद्वती मे दृष्टिं न नन्दयति संस्मरणीयशोभा" । इति शाकुन्तले ।)

अन्तवासी, [न्] पुं, (अन्तेऽध्येतुमध्यापकसमीपे वसति, अन्त + वस् + णिनि उपपदसमासः ।) अन्तेवासी । शिष्यः । इत्यमरटीकायां भरतः ॥

अन्तशय्या, स्त्री, (अन्ताय नाशाय शय्या शयनं शी + भावे क्यप् । स्त्रियां टाप्) भूमिशय्या । मृत्युः । श्मशानं । इति मेदिनी ॥
("अन्तशय्या मृतौ भूमिशय्यायां पितृकानने" । इति मेदिनी ।)

अन्तावशायी, [न्] पुं, (अन्ते नीचजातितया ग्रामसीमायामवशेते तिष्ठति, अन्त + अव + शी + णिनि उपपदसमासः ।) चण्डालः । मुनिविशेषः । इति हेमचन्द्रः ॥ नापितः । इत्यमरः ॥

अन्तिः, स्त्री, (अन्त्यते ज्येष्ठभगिनीत्वेन सम्बध्यतेऽसौ, अन्त + करोत्यर्थे णिच् + इक् । अन्तिकेति पाठे स्वार्थे कन् स्त्रियां टाप् ।) नाट्योक्तौ ज्येष्ठा भगिनी । इति शब्दरत्नावली ॥ (अन्तिका भगिनी ज्येष्ठेत्यमरः ।) समीपे च । यथा । "मुग्धप्रभीतवदुपेयतुरन्तिमात्रोः" । इति श्रीभागवतं ॥

अन्तिकं, त्रि, (अन्तः सामीप्येन विद्यतेऽस्य, अन्त + ठन् तस्य इकः ।) निकटं । इत्यमरः ॥ सामीप्ये क्ली । इति धरणी ॥ ("अन्तर्गतप्रार्थनमन्तिकस्थं" । "स्वनसि मृदु कर्णान्तिकचरः" । इति शाकुन्तले । "ननु मां प्रापय पत्युरन्तिकम्" । इति कुमारसम्भवे ।)

अन्तिकतमः, त्रि, (अतिशयेन अन्तिकः, अन्तिक + तम ।) अतिनिकटः । तत्पर्य्यायः । नेदिष्ठः २ । इत्यमरः ॥ नेदीयान् ३ अन्तितमः ४ । इति जटाधरः ॥

अन्तिका, स्त्री, (अन्तः नाट्याय अभिनेतृसामीप्यमस्याः अस्ति, अन्त + ठन् तस्य इकः स्त्रियां टाप् ।) नाट्योक्तौ ज्येष्ठा भगिनी । इत्यमरः ॥ तत्पर्य्यायः । अत्तिका २ अर्त्तिका ३ । इति तट्टीका । चुल्ली । शातलानामौषधं । इति मेदिनी ॥ चामारकषा इति ख्याता ।
("अन्तिकं निकटे वाच्यलिङ्गं स्त्री शातलौषधौ । चुल्ल्यां ज्येष्ठभगिन्याञ्च नाट्योक्त्या कथ्यतेऽन्तिका" ॥ इति मेदिनी ।)

अन्तिकाश्रयः, पुं, (अन्तिकस्य आश्रयः अवलम्बनं, षष्ठीतत्पुरुषः ।) निकटाश्रयः । समीपस्थावलम्बनं । तत्पर्य्यायः । उपघ्नः २ । इत्यमरः ॥

अन्तिमः, त्रि, (अन्त + डिमच् ।) अन्ते भवः । चरमः । अन्त्यः । इति जटाधरः ॥
("अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः ।
सकृत् दुःखकरावाद्यावन्तिमस्तु पदे पदे" ॥
इति हितोपदेशः ।) अतिनिकटः । इत्यमरटीकायां नीलकण्ठः ॥

अन्तेवासी, [न्] पुं, (अन्ते विद्यामध्येतुमध्यापकसमीपे वसति । चण्डालपक्षे तु नीचजातितया ग्रामप्रान्ते वसति शयवासेत्यलुक्, अन्त + वस् + णिनि ।) शिष्यः ।
("कृशाश्वान्तेवासी कुशिकपतिराज्ञापयति वः" । इति महावीरचरिते ।
"तात ! प्राचेतसान्तेवासी लवोऽभिवादयते" । इति उत्तरचरिते ।) चण्डालः । इत्यमरः ॥ प्रान्तस्थायिनि त्रि ॥ इति विश्वः ॥

अन्त्यं, क्ली, (अन्ते भवं, अन्त + यत् ।) दशसागरसंख्या । सहस्रलक्षकोटिः । इति लीलावती ॥ द्वादशलग्नं । इति ज्योतिषं ॥

अन्त्यः, त्रि, (अन्ते भवः, अन्त + यत् ।) अन्ते भवः । शेषोत्पन्नः । अधमः । जघन्यः । इति मेदिनी ॥ (अन्तिमः । चरमः । शेषः ।
"असह्यपीड़ं भगवन् ऋणमन्त्यमवेहि मे" । इति रघुवंशे ।)

अन्त्यः, पुं, (अन्ते भवः अन्त + यत् ।) मुस्ता । इति मेदिनी ॥ मुता घास इति भाषा । म्लेच्छः । इति प्रायश्चित्ततत्त्वं ॥

अन्त्यजः, पुं, (अन्त्यो भूत्वा जायते, अन्त्य + जन् + डः ।) शूद्रः । इति हलायुधः ॥ रजकादिसप्तजातयः । यथा,—
"रजकश्चर्म्मकारश्च नटो वरुड़ एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" ॥
इति यमवचनं ॥ जघन्यजे त्रि ॥

अन्त्यजन्मा, [न्] पुं, (अन्त्यं ब्राह्मणक्षत्त्रियविशां जन्मानन्तरं जन्म यस्य सः ।) चतुर्थवर्णः । शूद्रः । इति रत्नावली ॥
("प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः" । इति मनुः ।)

अन्त्यजातिः, पुं, (अन्त्या जातिर्जन्म यस्य सः ।) चाण्डालादिः । यथापस्तम्बः ।
"अन्तजातिरविज्ञातो निवसेद्यस्य वेश्मनि ।
स वै ज्ञात्वा तु कालेन कुर्य्यात्तत्र विशोधनं ॥
चान्द्रायणं पराको वा द्विजातीनां विशोधनं ।
प्राजापत्यन्तु शूद्राणां तथा संसर्गदूषणे ॥
यैस्तत्र भुक्तं पक्वान्नं कृच्छ्रं तेषां विनिर्द्दिशेत् ।
तेषामपि च यैर्भुक्तं तेषामर्द्धं विधीयते" ॥
इति प्रायश्चित्ततत्त्वं ॥

अन्त्यभं, क्ली (अन्त्यं शेषस्थितं भं नक्षत्रं कर्म्मधारयः ।) रेवतीनक्षत्रं । मीनराशिः । इति ज्योतिषं ॥

अन्त्यवर्णः, पुं, (अन्त्यः वर्णः जातिः कर्म्मधारयः ।) शूद्रः । इति हेमचन्द्रः ॥

अन्त्यावसायी, [न्] पुं, (अन्त्यः सन् अवस्यति, अन्त्य + अव + सो + णिनि उपपदसमासः ।) चाण्डालादिसप्तजातयः । यथा,—
"चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः" ॥
इति अङ्गिराः ॥ (निषादस्त्रियां चण्डालजातो मुद्दाफरास इति ख्यातः संकीर्णजातिविशेषः ।
"निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनं ।
श्मशानगोचरं सूते वाह्यानामपि गर्हितम्" ॥
इति मनुः ।)

अन्त्येष्टिः, स्त्री, (अन्त्या अन्ते भवा इष्टिः, कर्म्मधारयः ।) चरमसंस्कारः । स तु शवदाहादिरूपः । यथा,—
"सपिण्डादिभिदाशौचसंक्षेपोऽन्त्येष्टिपद्धतिः" । इति शुद्धितत्त्वप्रतिज्ञायां स्मार्त्तभट्टाचार्य्यः ॥ तत्प्रयोगो दाहशब्दे द्रष्टव्यः ॥ तदनन्तरं पूरकपिण्डप्रमाणं पिण्डशब्दे द्रष्टव्यं ॥ तस्य प्रयोगोऽत्र लिख्यते । ततः पिण्डदानं तत्र क्रमः । तण्डुलप्रसृतिद्वयं त्रिः प्रक्षाल्य ऐशान्यां दिशि सुखिन्नं पचेत् । ततः पवित्रपाणिः प्राचीनावीती पातितवामजानुर्दक्षिणामुखो हस्तप्रमाणां चतुरङ्गुलोच्छ्रायां दक्षिणप्लवां पिण्डिकां कृत्वा तदुपरि रेखां कृत्वा दर्भानास्तीर्य्य तिलान् प्रक्षिप्य । ॐ अमुकगोत्रप्रेतामुकदेवशर्म्मन्नवनेनिक्ष्व इत्यास्तीर्णकुशोपरि सतिलजलेनावनेजयेत् । ततस्तिलमधुघृतादिमिश्रं तप्तपिण्डं गृहीत्वा अद्यामुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणः एतत् प्रथमपिण्डं पूरकं इत्यवने जनस्थाने दद्यात् । ततः पिण्डपात्रक्षालनजलेन पुनरवनेजयेत् । ॐ अमुकगोत्रप्रेतामुकदेवशर्म्मन्नेतत्ते ऊर्णातन्तुमयं वासः । ततः आममृण्मयपात्रे जलाञ्जलिं पिण्डसमीपे स्थापयेत् । गन्धं माल्यञ्च यथाशक्ति दद्यात् । वाष्पपर्य्यन्तं पिण्डं पर्य्युक्षिष्ठेत् । ततः पिण्डादिकं जले क्षिपेत् । कालेऽप्यकृतचूड़ोपनयनानां अनूढ़कन्यानाञ्च कुशास्तरणं विनेति शेषः । एवं कृतचूड़ानामुपनयनकालात् प्राक् दर्भोपरि पिण्डदानं । उपनयनकाले आगते त्यक्तोपनयनानां दर्भोपरि पिण्डदानं । एवं अष्टवर्षविवाहकाले आगते ऊढ़स्त्रीणां दर्भोपरि पिण्डदानं । रात्रावाचम्य दक्षिणामुखः प्राचीनावीती पातितवामजानुः त्रिकाष्ठिकोपरि मृण्मयपात्रे उदकं तथा पात्रान्तरे क्षीरं निधाय प्रेतात्र स्नाहि पिब चेदं क्षीरमिति ब्रूयात् । तदेकरात्रमावश्यकं दशरात्रं फलभूयस्त्वार्थमिति । द्वितीयपिण्डादिषु द्वितीयं पिण्डं पूरकं इत्यादिविशेषः । द्वितीयपिण्डे मृण्मयपात्रद्वये जलाञ्जलिद्वयं । तृतीयादिपिण्डे पात्रादिवृद्धिः । येन पञ्चपञ्चाशत् पात्राण्यञ्जलयश्च तावन्ति । त्र्यहाशौचप्रथमदिने पिण्डानां त्रयं । द्वितीयदिने चतुष्टयं । तृतीये त्रयं । प्रथममेकं द्वितीये चतुष्टयं । तृतीये पञ्चमं वा कल्पः । चतुरहाशौचे प्रथमचतुर्थयोर्द्वौ द्वौ । द्वितीयतृतीययोस्त्रयस्त्रयः । पञ्चाहाशौचे तु प्रथमपञ्चमदिनयोरेकैकशः पिण्डः । द्वितीयचतुर्थयोर्द्वौ द्वौ । तृतीये चत्वारः । षड़हाशौचे द्वितीयचतुर्थदिनयोस्त्रयस्त्रयः । शेषेष्वेकैकः । सप्ताहाशौचे तृतीयचतुर्थपञ्चमदिनेषु द्वौ द्वौ । शेषेष्वेकैकः । अष्टाहाशौचे चतुर्थपञ्चमदिनयोर्द्वौ द्वौ । शेषेष्वेकैकः । नवाहाशौचे तु पञ्चमदिने द्वौ । शेषेष्वेकैकः । पक्षिणीद्व्यहाशौचयोश्च